# "अणुभाष्यं"

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ ॥ नारायणंगुणैःसर्वै
रुदीर्णंदोषवर्जितं ॥ ज्ञेयंगम्यंगुरूंश्चापिनत्वासूत्रार्थउच्यते ॥१॥ विष्णुरेवविजिज्ञास्यःसर्वकर्ताऽऽगमोदि
तः ॥ समन्वयादीक्षतेश्चपूर्णानंदोंतरःखवत् ॥२॥ प्रणेताज्योतिरित्याद्यैःप्रसिद्धैरन्यवस्तुषु ॥ उच्यतेवि
ष्णुरेवैकःसर्वैःसर्वगुणत्वतः ॥३॥ सर्वगोत्तानियंताचदृश्यत्वाद्युज्झितःसदा ॥ विश्वजीवांतरत्वाद्यैर्लिंगैःस
र्वैर्युतःसहि ॥४॥ सर्वाश्रयःपूर्णगुणःसोक्षरःसन्हृदब्जगः ॥ सूर्यादिभासकःप्राणप्रेरकोदैवतैरपि ॥५॥ ज्ञे
योनवेदैःशूद्राद्यैःकंपकोन्यश्चजीवतः ॥ पतित्वादिगुणैर्युक्तस्तदन्यत्रचवाचकैः ॥६॥ मुख्यतःसर्वशब्दैश्चवा
च्यएकोजनार्दनः ॥ अव्यक्तःकर्मवाक्यैश्चवाच्यएकोऽमितात्मकः ॥ ७॥ अवांतरंकारणंचप्रकृतिःशून्यमेव
च ॥ इत्याद्यन्यत्रनियतैरपिमुख्यतयोदितः ॥ शब्दैरतोनंतगुणोयच्छब्दायोगवृत्तयः ॥ ८ ॥ इतिश्रीम
त्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्येश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेप्रथमोऽध्यायः ॥ १ ॥ ॥
ॐ ॥ श्रौतस्मृतिविरुद्धत्वात्स्मृतयोनगुणान्हरेः ॥ निषेद्धुंशक्नुयुर्वेदानित्यत्वान्मानमुत्तमं ॥१॥ देवतावचना
दापोवदंतीत्यादिकंवचः ॥ नायुक्तवाद्यसन्नैवकारणंदृश्यतेक्वचित् ॥ २ ॥ असज्जीवप्रधानादिशब्दाब्रह्मैव

नापरं ॥ वदंतिकारणत्वेनक्वापिपूर्णगुणोहरिः ॥ ३ ॥ स्वातंत्र्यात्सर्वकर्तृत्वान्नायुक्तंतद्वदेच्छ्रुतिः ॥ भ्राति
मूलतयासर्वसमयानामयुक्तितः ॥ ४ ॥ नतद्विरोधाद्वचनंवैदिकंशंक्यतांव्रजेत् ॥ आकाशादिसमस्तंच
तज्जंतेनैवलीयते ॥ ५ ॥ सोनुत्पत्तिलयःकर्ताजीवस्तद्वशगःसदा ॥ तदाभासोहरिःसर्वरूपेष्वपिसमःसदा
॥ ६ ॥ मुख्यप्राणश्चेंद्रियाणिदेहश्चैवतदुद्भवः ॥ मुख्यप्राणवशेसर्वंसविष्णोर्वशगःसदा ॥ ७ ॥ सर्वदोषो
ज्झितस्तस्माद्भगवान्पुरुषोत्तमः ॥ उक्तागुणाश्चाविरुद्धास्तस्यवेदेनसर्वशः ॥ ८ ॥ इतिश्रीमत्कृष्णद्वैपाय
नकृतब्रह्मसूत्राणुभाष्येश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेद्वितीयोऽध्यायः ॥ २ ॥ ॥
ॐ॥शुभेनकर्मणास्वर्गंनिरयंचविकर्मणा ॥ मिथ्याज्ञानेनचतमोज्ञानेनैवपरंपदं ॥ १ ॥ यातितस्माद्विरक्तःस
न्ज्ञानमेवसमाश्रयेत् ॥ सर्वावस्थाप्रेरकश्चसर्वरूपेष्वभेदवान् ॥ २ ॥ सर्वदेशेषुकालेषुसएकःपरमेश्वरः॥ तद्भ
क्तितारतम्येनतारतम्यंविमुक्तिगं ॥ ३ ॥ सच्चिदानंदआत्मेतिमानुषैस्तुसुरेश्वरैः ॥ यथाक्रमंबहुगुणैर्ब्रह्मणात्व
खिलैर्गुणैः ॥ ४ ॥ उपास्यःसर्ववेदैश्चसर्वैरपियथाबलं ॥ ज्ञेयोविष्णुर्विशेषस्तुज्ञानेस्यादुत्तरोत्तरं ॥५॥ सर्वेपिपु ॥१५९॥
रुषार्थाःस्युर्ज्ञानादेवनसंशयः ॥ नलिप्यतेज्ञानवांश्चसर्वदोषैरपिकचित् ॥ ६ ॥ गुणदोषैःसुखस्यापिवृद्धिह्रासौ

विमुक्तिगौ ॥ नृणांसुराणांमुक्तौतुसुखंक्रमंयथाक्रमं ॥ ७ ॥ इतिश्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये
श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥
ॐ ॥ विष्णुर्ब्रह्मतथादातेत्येवंनित्यमुपासनं ॥ कार्यमापद्यपिब्रह्मतेनयात्यपरोक्षतां ॥ १ ॥ प्रारब्धकर्मणोन्य
स्यज्ञानादेवपरिक्षयः ॥ अनिष्टस्योभयस्यापिसर्वस्यान्यस्यभोगतः ॥ २ ॥ उत्तरेषूत्तरेष्वेवंयावद्वायुंविमुक्ति
गाः ॥ प्रविश्यभुंजतेभोगांस्तदंतर्बहिरेववा ॥ ३ ॥ वायुर्विष्णुंप्रविश्यैवभोगश्चैवोत्तरोत्तरं ॥ उत्क्रम्यमानु
षामुक्तिंयांतिदेहक्षयात्सुराः ॥ ४ ॥ अर्चिरादिपथावायुंप्राप्यतेनजनार्दनं ॥ यांत्युत्तमानरोचाद्याब्रह्मलोका
त्सहामुना ॥५॥ यथासंकल्पभोगाश्चचिदानंदशरीरिणः ॥ जगत्सृष्ट्यादिविषयेमहासामर्थ्यमप्यृते ॥ ६ ॥
यथेष्टशक्तिमंतश्चविनास्वाभाविकोत्तमान् ॥ अनन्यवशगाश्चैववृद्धिह्रासविवर्जिताः ॥ दुःखादिरहितानि
त्यंमोदंतेऽविरतंसुखं ॥ ७ ॥ पूर्णप्रज्ञेनमुनिनासर्वशास्त्रार्थसंग्रहः ॥ कृतोयंप्रीयतांतेनपरमात्मारमापतिः
॥ ८ ॥ नमोनमोशेषदोषदूरपूर्णगुणात्मने ॥ विरिंचिशर्वपूर्वेड्यवंद्यायश्रीवरायते ॥ ९ ॥ इतिश्रीमत्कृ
ष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्येश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥

॥ इति श्रीमदणुभाष्यं संपूर्णं ॥